विषवागासौ विक्रुष्टेनाभिधावकः। अकारणेन विक्रोष्टा चाण्डालस्पर्शोत्तमान् स्पृशन्। शूद्रप्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः। अयुक्तं शपथं कुर्वन् अयोग्यो योग्यकर्मकृत्। वृषक्षुद्रपशूनाञ्च पुंस्त्वस्य प्रतिघातकृत्। साधारणस्यापलापी दासीगर्भविनाशकृत्। पितृपुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः। एषामपतितान्योन्यत्यागी च शतदण्डभाक्" इति। "अज्ञानकर्तृके साहसिके पित्रादिबान्धवाः। प्रष्टव्या राजपुरुषैः सामादिभिरुपक्रमैः। विज्ञेयोऽसाधुसंसर्गाच्चिह्नैर्होढेन वा नरैः। एषोदिता घातकानान्तस्कराणाञ्च भावना। गृहीतः शङ्कया वस्तु न तत्कार्यं प्रपद्यते। शपथेनावबोद्धव्यः सर्ववादेष्वयं विधिः" इति। चिह्नं रक्तलेपादि होढोऽपहृतस्य धनादिकम्। ज्ञानानन्तरकर्त्तव्यमाह व्यासः "ज्ञात्वा तु घातकं सम्यक् ससहायं सबान्धवम्। हन्याच्चित्रबधोपायैरुद्वेजनकरैर्नृपः" इति। बृहस्पतिः "प्रकाशघातका ये तु तथा चोपांशुघातकाः। ज्ञात्वा सम्यग्धनं हृत्वा हन्तव्या विविधैर्बधैः" इति। ब्राह्मणक्षत्रियादिविषयमेतत्। यत आह बौधायनः "क्षत्रियादीनां ब्राह्मणस्य बधे बधः सर्वस्वहरणञ्च तेषामेव तुल्यापकृष्टबधे यथाबलमनुरूपं दण्डञ्च कल्पयेदिति" तेषां क्षत्रियादीनान्तुल्यापकृष्टबधे सजातीयहीनजातीयबधे दण्डं शारीरदण्डम्। एकघातार्थप्रहर्त्तॄणां बहूनान्दोषानुरूपं दण्डमाह कात्यायनः "एकश्चेद्बहवो हन्युः संरब्धाः पुरुषा नराः। मर्मघाती तु यस्तेषां स घातक इति स्मृतः"। यो मर्मघातकः स एव बधापराधदण्डभागित्यर्थः। स एव "आरम्भकृत्सहायश्च दोषभाक्काऽनुदेशकः। आश्रयः शस्त्रदाता च भक्तदाता विकर्मिणाम्। युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकः। उपेक्षाकार्य्ययुक्तश्च दोषवक्तानुमोदकः। अनिषेद्धा क्षमो यः स्यात् सर्वे ते कार्य्यकारिणः। यथाशक्त्यनुरूपन्तु दण्डमेषां प्रकल्पयेत्" इति। बृहस्पतिरपि "एकञ्च बहवो यत्र प्रहरन्ति रुषान्विताः। मर्मप्रहारको यस्तु घातकः स उदाहृतः। मर्मघाती तु यस्तेषां यथोक्तं दापयेद्दमम्। आरम्भकृत्सहायश्च दोषभागी तदर्द्धतः। क्षतस्यात्मनहृत्यस्य मर्मस्थानस्य यत्नतः। सामर्थ्यञ्चानुबन्धञ्च ज्ञात्वा चिह्नैः प्रसाधयेत्" इति। विषयविशेषे मनुष्यबधकर्तुर्दण्डाभावं दोषाभावप्रदर्शनच्छलेनाह मनुः "शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते। द्विजातीनाञ्च वर्णानां विप्लवे कालकारिते। आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति" इति। यत्र देशे काले च धर्मस्तटाकादिरूपो भेदनच्छेदनादिनाऽपरुध्यते तथा शूद्रेतरवर्णसङ्करे परदाराक्रमणादिरूपे राजाभावकालकारिते। तथात्मनः परतः प्राणसंशये। तथा दक्षिणानां सङ्करे गोग्रहणनिमित्तके युद्धे। तथा स्त्रीविप्राभ्युपपत्तौ दुर्बलहिंसानिवारणे। धर्मेङ्गितो घ्नन् न दुष्यति यतः। अतस्तत्र द्विजातिभिः क्षत्रधर्मव्यापाररहितैरपि समर्थैः शस्त्रं ग्राह्यमित्यन्वयः। अत्र द्विजातिग्रहणं ब्राह्मणवैश्यविषयम्। प्रजापालनार्थं क्षत्रियस्य वचनान्तरेणैव शस्त्रग्रहणस्य प्राप्तत्वादित्यभिसन्धायैव बौधायन आह "ब्राह्मणार्थे गवार्थे च वर्णानां वापि सङ्करे। गृह्णीयातां विप्रविशौ शस्त्रं धर्मव्यतिक्रमे" इति। यत्तु "परीक्षार्थमपि ब्राह्मण आयुधन्नाददीत" इत्यापस्तम्बवचनम्। यच्च बौधायनवचनम् "हास्यार्थमपि ब्राह्मण आयुधं नाददीतेति" तद्द्वयमपि धर्मोपरोधादिभिन्नविषयम्। साहसस्तेयस्य क्रोधलोभकृतत्वमाह बृहस्पति "साम्प्रतं साहसस्तेयं श्रूयतां क्रोधलोभजम्" इति। स्त्रीसंग्रहणाख्यसाहसस्वरूपमाह स एव "अनिच्छन्त्या यत् क्रियते सुप्तोन्मत्तप्रमत्तया। प्रलपन्त्या वा रहसि बलात्कारकृतन्तु तत्" इति। अनिच्छन्त्या परपुरुषेण सहेति शेषः। अनिच्छन्त्या यानि चिह्नानि तस्याः कर्त्तव्यं राजकर्त्तव्यं चाह संवर्त्तः "नेच्छन्त्या यानि चिह्नानि बलात्कारकृतानि च। परपुंसः प्रसङ्गेषु नारीणान्तानि दृश्यतः। नखदन्तक्षतच्छायासकचग्रहवीक्षिता। सद्यो निःश्वासिता नारी बलात्कारेण दूषिता। उच्चैर्विक्रोशयन्ती च रुदन्ती लोकसन्निधौ। तस्य नामवदन्ती च यथाहन्तेन दूषिता। शोचेदेवंविधैर्लिङ्गैर्नखाक्षतपयोधरा। चिकुरालङ्कारकेशैश्च व्याकुलीकृतलोचना। राज्ञा वध्यैः सभां नीत्वा स्वयमन्विष्य तत्क्षणात्। यद्ब्रूयात् सहजं तत्र तत् कर्त्तव्यं प्रयत्नतः। विवादे साक्षिणामत्र प्रकुर्वीत परिग्रहम्। प्रार्थनादभिशस्तस्य न दिव्यं दातुमर्हति" इति। अत्र दण्डमाह मनुः "सहस्रं ब्राह्मणो दण्ड्यो विप्रां गुप्तां बलाद्व्रजन्" इति। गुप्तां स्वनियमेन रक्षिताम्। क्षत्रियादिसवर्णविषये दण्डमाह बृहस्पतिः "सहसा